CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सितम्बर २००१ ईसवीयाब्दः R.N.I. Regd No. UPBIL/1998/1485

ज्वालापुरीय गुरुकुल महाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

"भारते भातु भारती"

अस्थिरं नो पदं स्यात्

—डॉ० प्रशस्यमित्रः शास्त्री
बी–२१ आनन्द नगरम्, जेल रोड, रायबरेली (उ०प्र०)

(१)

अभिनवमुखहास्यं सुन्दराणां शिशूनाम्,
जनयति हृदि शान्तिं प्रायशो मानवानाम् ।
उदरमिह परं तद् रिक्तमालक्ष्य तेषाम्,
भवति बहु-विषादो मानसे नैव केषाम् ? ।।

(२)

प्रविशति पतिगेहे सुन्दरी कोमलाङ्गी
यदि विभव-विहीना सद्गुणा सद्वधूटी ।
परमिह धनलुब्धैः पीड्यते यौतकार्थम्,
अहह ! भवति पीडा मर्म-संघातिनी सा ।।

(३)

अयि विटप ! फलं ते प्रत्यहं भुञ्जते ये
कुसुममपि सपत्रं गृह्णते ये विलुञ्च्य ।
पुनरपि ददसे त्वं शङ्कुलाऽऽसञ्जनार्थम्
समिधमिह सहर्षं तत्कृतघ्नेभ्य एवं ।।

(४)

मलयज ! तव शैत्यं नैव किञ्चिन्मदीये
शिरसि हरति पीडां दुःखदारिद्र्यजन्याम् ।
अनशनमिह कृत्वा निर्धना ये तु सुप्ताः
दिवि दिवि ननु दृष्ट्वा मस्तकं पीडितं नः ।।

(५)

कमल ! तव परागे षट्पदा गन्धलुब्धाः
निशि निशि मदमत्ताः शेरते कोश-बद्धाः ।
मम हृदि बहु कष्टं वर्त्तते यद् द्विरेफान्
अवसि न हि शरण्यांस्त्वं कथं वारणेभ्यः ? ।।

(६)

शशधर ! किरणास्ते नैव शान्तिं कथञ्चित्
प्रददति भुवि दृष्ट्वा सञ्चये लोभमग्नान् ।
अहरहरतिमात्रं भोग्य-वस्तु-प्रसारे
अभिनवधनिकांस्तान् दुर्मदान् सत्त्वहीनान् ।।

(७)

मिहिर ! तव मयूखा भेदभावं विनाऽपि
प्रतिगृहमिह भूमौ सर्वथा निष्पतन्ति ।
वयमपि तु समानाः स्याम नित्यं कथन्न ?
यदि मनुज-समाजे भेदभावः परास्तः ।।

(८)

गिरिवर ! गरिमा ते साम्प्रतं नैव मन्ये
भवतु जगति पूर्वं ते गुरुत्वं कदाचित् ।
जरसि तु पितरो ये पालनीया इदानीम्
अहह ! नरयुवभ्यस्ते महाभारभूताः ।।

[शेषांशः २ पृष्ठे]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भारतोदयः

संस्कृत–मासिकपत्रम्

वर्षम्–६२ अङ्कः - ३

सम्पादकः

डॉ० हरिगोपालशास्त्री

व्याकरणाचार्यः

एम्०ए०, पी–एच्०डी०

राष्ट्रपति–पुरस्कृतः

सह–सम्पादकः

डा० केशवप्रसाद उपाध्यायः

साहित्याचार्यः

एम्०ए०, पी–एच्०डी०

प्रबन्ध–सम्पादकः

डा० अजयकौशिकः

एम्०ए०, साहित्याचार्यः

प्रकाशकः

गुरुकुलमहाविद्यालयः ज्वालापुरम्

हरिद्वारम्- २४६४०५

(उत्तराञ्चल–प्रदेशः)

शुल्क-विवरणम्

प्रत्यङ्कम्	—	५/–
वार्षिकम्	—	५०/–
आजीवनम्	—	५००/–

विषयानुक्रमणिका

१–श्रुतिसुधा	—महर्षिदयानन्दः सरस्वती	३
२–वैदिककविर्महर्षिरगस्त्यो मैत्रावरुणः	—डा० रामकिशोरमिश्रः	४
३–विदाङ्कुर्वताम् (गलज्जलिका)	—मिश्रोऽभिराजराजेन्द्रः	६
४–निरुक्ते दार्शनिकं तत्त्वम्	—मञ्जुकुमारी पाण्डेयः	७
५–स्मरामि परमाचार्यान्	—श्री पं० रवीन्द्रनाथः गुरुः	६
६–लोकतन्त्र-शतकम् (२)	—डा० निरञ्जनमिश्रः	१०
७–पञ्चनदो देशः	—डा० सावित्रीदेवी शर्मा	१३
८–संस्कृतवाङ्मये जलविज्ञानम् (प्राकृतिक-स्रोतांसि जलञ्च)	—डा० रामसुमेरयादवः	१४
९–दिल्ली संस्कृत अकादमी, दिल्ली सरकार (विज्ञापनम्)	.....	१७
१०–महाविद्यालय समाचाराः	.....	१८
११–रॉच्यां संस्कृतदिवस-समारोहः सुसम्पन्नः	—डा० रामाशीषपाण्डेयः	१९

अस्थिरं नो पदं स्यात्

[प्रथम पृष्ठस्य शेषांशः]

(९)

अतुलितजलराशौ ये हठात् सम्प्रविष्टाः
जलनिधि-तल-भूमिं मर्दयन्ते वगाह्य ।
परमिह भुवि कष्टं यत्खलानां त एव
मनसि निहितभावं नैव बोद्धुं समर्थाः ॥

(१०)

पथि पथि यदि तीक्ष्णा जीवने सन्ति शूलाः
रहसि च रिपवस्त्वां सर्वदा भीषयन्ते ।
पुनरपि गमनं ते सत्यमार्गेषु बन्धो !
कथमपि च पदं स्यादस्थिरं नो जगत्याम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

भविक-भरित-भारतोदयोऽयं भव-विभवोद्भवभावनाभिलाषी ।
भगवति भुवि भक्ति-भावभाजां भव-भय-भाव-भरं भ्रियान्नभूमन् ॥

× × ×

निशम्यतां लेख-ललाम-सञ्चय—प्रकाशने येन कृतोऽतिनिश्चयः ।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः' ॥

वर्षम् – ९२ | आश्विन २०५८ विक्रमाब्दः, सितम्बर २००१ ईसवीयाब्दः | अङ्कः – ३

श्रुतिसुधा

ओ३म् चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ॥

—ऋग्वेद १/१०५/१

पदार्थः —

(चन्द्रमाः) आह्लादकारकः इन्दुलोकः । (अप्सु) प्राणभूतेषु वायुषु । (अन्तः) (आ) (सुपर्णः) शोभनं पर्णं पतनं गमनं यस्य । (धावते) (दिवि) सूर्यप्रकाशे । (न) निषेधे । (वः) युष्माकम् । (हिरण्यनेमयः) हिरण्यस्वरूपा नेमिः सीमा यासां, ताः । (पदम्) विचारमयं शिल्पव्यवहारम् । (विन्दन्ति) लभन्ते । (विद्युतः) सौदामिन्यः । (वित्तम्) विजानीतम् । (मे) मम पदार्थ-विद्याविदः सकाशात् । (अस्य) (रोदसी) द्यावापृथिव्याविव राजप्रजे जनसमूहौ ॥ १ ॥

भावार्थः —

हे राजप्रजापुरुषौ ! यश्चन्द्रमसश्छायान्तरिक्षजल-संयोगेन शीतलत्वप्रकाशस्तं विजानीतम् । या विद्युतः प्रकाशन्ते ताश्चक्षुर्ग्राह्या भवन्ति, या प्रलीनास्तासां चिह्नं चक्षुषा ग्रहीतुमशक्यम् । एतत् सर्वं विदित्वा सुखं सम्पादयेतम् ।

— महर्षिदयानन्दसरस्वती

[ऋग्वेदभाष्यम्, तृतीयो भागः, ५८० पृष्ठे]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैदिकविर्महर्षिरगस्त्यो मैत्रावरुणः

डॉ० आचार्य रामकिशोरमिश्रः
संस्कृत–विभागाध्यक्षः महामना मालवीय महाविद्यालयः
खेकड़ा–२०११०१, बागपत, (उ० प्र०)

महर्षिरगस्त्यो मित्रवरुणयोः पुत्रो बभूव। मित्रवरुणनामकदेवयोरमोघतेज एकस्मिन् दिव्ये यज्ञियकलशे पुञ्जीभूतम्। तस्य कलशस्य मध्य–भागाद् दिव्यतेजः सम्पन्नो महर्षिरगस्त्यः प्रादुर्भूतः। यथा ऋग्वेदेऽयमुल्लेखः प्राप्यते—

विद्युतो ज्योतिः परि संजिहानं मित्रावरुणा यदपश्यतां त्वा। तत्ते जन्मोतैकं वसिष्ठागस्त्य यत्त्वा विश आजभार ॥

—ऋग्० ७/३३/१०

वसिष्ठ=वशेन्द्रिय, अगस्त्य ! देहधारणाय विद्युज्ज्योतिस्त्यजन्तं त्वां मित्रवरुणावपश्यताम्। ततस्तव जन्म बभूव। तथा च—

सत्रे ह जाताविषिता नमोभिः कुम्भे रेतः सिषिचतुः समानम्। ततो ह मान उदियाय मध्यात्ततो जातमृषिमाहुर्वसिष्ठम् ॥

—ऋग्० ७/३३/१३

अस्या ऋचाया भाष्ये श्रीमानाचार्यसायणो लिलेख- 'ततो वासती-वरात् कुम्भाद् मध्यादगस्त्य उदियाय।' तत एव कुम्भाद् वसिष्ठमप्यृषिं जातमाहुः।

अगस्त्यो महातेजास्तथा महातपा महर्षिरासीत्। समुद्रस्थराक्षसाऽत्याचारत्रस्ता देवा महर्षिशरणं गता राक्षसभयञ्चाऽश्रावयन्। ततस्तेन समुद्रजलं पीतम्, येन राक्षसा नष्टाः। एकदा विन्ध्याचलेन सूर्यमार्गोऽवरुद्धः। ततो दिवाकरोऽस्य शरणं प्राप। ततोऽस्य तपोबलेन स विन्ध्यो विनतः सूर्यस्य च पन्था बाधारहितो बभूव। श्रीरामो वनं गत्वा अस्याऽऽश्रमं गतः। ततोऽनेन तस्मै दिव्यशस्त्राणि प्रदत्तानि। अस्य पत्नी विदुषी लोपामुद्रा ऋग्वेदे सूक्तकारा[1] ऋषिकाऽस्ति। अस्याः केचन मन्त्रा यजुर्वेदे[2]ऽपि सन्ति। अस्याः सूक्तमगस्त्य-स्यापि मन्यते।

महर्षिणाऽगस्त्येनाऽश्वनेत्राङ्कितानि [२७] सूक्तानि[3] विरचितानि। तेषु वसुकालाऽऽत्मा ऽङ्किता (२३८) ऋचाः सन्ति। इमा ऋचा इन्द्र मरुदश्विद्यावापृथिवीसूर्याऽग्निविश्वेदेवा दिविषये लिखिताः सन्ति। आकाशपृथिवीविषयेऽगस्त्यो विरचति—

द्यौर्वः पिता पृथिवी माता सोमो भ्रातादितिः स्वसा। अदृष्टा विश्वदृष्टास्तिष्ठतेलयता सु कम् ॥

ऋग्० १/१९१/६

(१) ऋग्वेदः १/१७९ (२) यजुर्वेदः १७/१३ (३) ऋग्वेद १/१६५-१९१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हे विश्वदृष्टा अदृष्टाश्च लोकाः ! द्यौर्युष्माकं पिता पृथिवी माता सोमो भ्राताऽदितिः स्वसा च । तिष्ठत, सु कम् = उत्तमसुखम्, इलयत = प्राप्नुत ।

अग्निं स्तुवता महर्षिणाऽगस्त्येन लिखितमस्मिन् विषये । यथा—

पाहि नो अग्ने पायुभिरजस्रैरुत प्रिये सदन आ शुशुक्वान् । मा ते भयं जरितारं यविष्ठ नूनं विदन्मापरं सहस्वः ॥

—ऋग्वेदः १/१८६/४

अग्ने ! शुशुक्वान् = विद्यां विनयञ्च प्राप्तस्त्वम्, अजस्रैः = निरन्तरम्, पायुभिः = रक्षोपायैः, प्रिये सदने, उत = वा शरीरे, नः = अस्मान् आ पाहि = रक्ष, पालय च । यविष्ठ = युवकतक्ष !, सहस्वः = सहनशील !, ते = तव, जरितारम् = स्तोतारं भयम्, मा विदत् = न प्राप्नोतु, माऽपरं नूनं = निश्चयेनाऽन्यमपि भयं न प्राप्नोतु । अपि च—

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि । विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥ [4]

देव = आनन्ददातः ! अग्ने = प्रकाशदातः ! विद्वान् सर्वशास्त्रवेत्ता त्वमस्मान्, राये = धनाय, सुपथा = सुमार्गेण, विश्वानि = समस्तानि, वयुनानि = ज्ञानानि, नय = प्रापय । जुहुराणम् = कुमार्गोत्पन्नम्, एनः = पापम्, अस्मद् युयोधि = पृथक्कुरु । ते = तव, भूयिष्ठाम् = अधिकतमाम्, नम उक्तिम् = स्तुतिं विधेम । ईश्वरस्य विषये मुनिरगस्त्यो लिखति । यथा—

स्वादो पितो मधो पितो वयं त्वा ववृमहे ।
अस्माकमविता भव ॥

—ऋग्० १/१८७/२

इन्द्रं स्तुवन् महर्षिरगस्त्यो विरचति—

अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ अस्ति देवता विदानः । न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ॥

—ऋग्० १/१६५/६

मघवन् !, ते = तव, अनुत्तमा = प्रेरितं न, नकिः = नास्ति किमपि विद्यमानम् । त्वावान् = त्वादृशः, विदानः = विद्वान्, देवता नास्ति । जायमानो न नशते = नश्यति । जातो न नश्यति । प्रवृद्ध ! यानि करिष्या = करणीयानि, तानि कर्माणि, आकृणुहि = सम्यक् कुरु ।

मरुतां स्तवं कुर्वता महर्षिणाऽगस्त्येन स्वविचारा प्रकटिताः सन्ति । यथा—

एष वः स्तोमो मरुत इयङ्कीर्मान्दार्यस्य मान्यस्य

—ऋग्० १/१६५/१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारोः । एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥ [5]

मरुतः ! एष वः=युष्माकं, स्तोमः=स्तुतिसमूहः । मान्दार्यस्य=आनन्दकर्तुः, मान्यस्य कारोः=कार्यशीलस्येयं गीः=वाणी, एषा आ यासीष्ट=प्राप्तं भवतु, तन्वे=शरीराय । वयां=वयं जनाः, इषम्=अन्नम्, वृजनम्=बलम्, जीरदानुम्=जीवनम्, विद्याम=प्राप्नुयाम ।

इन्द्रस्य प्रशंसायामगस्त्यो लिखति—

त्वमीशिषे वसुपते वसूनां त्वं मित्राणां मित्रपते धेष्ठः । इन्द्र त्वं मरुद्भिः सं वदस्वाध प्राशान ऋतुथा हवींषि ॥

—ऋग्० १/१७०/५

इन्द्र !, वसूनां वसुपते=धनानां धनपते ! त्वमीशिषे=त्वमैश्वर्यवानसि । मित्राणां मित्रपते !, त्वं धेष्ठः=श्रेष्ठधर्तासि । त्वं मरुद्भिः=पवनैः, संवदस्व=संवादं कुरु । अध=अनन्तरम्, ऋतुथा=ऋतूनामनुकूलानि, हवींसि=खाद्यान्नानि [6]प्र+अशान=सम्यग् भक्षय । इत्थमगस्त्येनाऽग्नीन्द्रमरुद्विश्वेदेवानां स्तुतयः कृताः । तपोबलेन समुद्रपानेऽयं प्रसिद्धः ।

गलज्जलिका

विदाङ्कुर्वताम्

☐ मिश्रोऽभिराजराजेन्द्रः
हिमाचलविश्वविद्यालयीयः, समरहित्त शिमला(हि.प्र

विदाङ्कुर्वतां नित्यहिंसाऽनुरक्ताः
यदत्रैव जातौ महावीरबुद्धौ ॥ १ ॥

विदाङ्कुर्वतां कर्मकाण्डेषु लीनाः
यदास्ते विमुक्तिर्ध्रुवं चित्तशुद्धौ ॥२॥

विदाङ्कुर्वतां सौख्यमन्वेषमाणाः
सुखं जायते शम्भुसाम्राज्यसिद्धौ ॥ ३ ॥

विदाङ्कुर्वतां सत्फले यत्नवन्तः
फलं सेवने, नो मुधा तालवृद्धौ ॥४॥

विदाङ्कुर्वतां निर्भयं भोक्तुकामाः
विरागेऽभयं केवलं, नो समृद्धौ ॥ ५ ॥

विदाङ्कुर्वतां पुष्करे श्रद्दधानाः
न भव्यं तदीयं परोवाहरुद्धौ ॥ ६ ॥

विदाङ्कुर्वतां कल्कनोद्विग्नचित्ताः
यदात्यन्तिकी क्लेशमुक्तिः प्रसिद्धौ ॥ ७ ॥

विदाङ्कुर्वतां श्रीप्रतिपाथोधिमग्नाः
रसः प्रेम्णि यस्तत्सपीतौ न सग्धौ ॥८॥

विदाङ्कुर्वतां तेऽभिराजोन्मनस्काः
न हार्दं परप्रत्ययोन्नेय-बुद्धौ ॥ ९ ॥

---

(५) अस्या ऋचाया अक्षरश आवृत्तिर्दृश्यते—१/६६/१५, १/१६७/११, १६८/१०, अस्याश्चतुर्थचरणस्याऽऽवृत्तिर्दृश्यते— १/१६६/८, १७१/६, १७३/१३, १७४/१०, १७५/६, १७६/६, १७७/५, १७८/५, १८०/१०, १८१/६, १८२/८, १८४/६, १८५/११, १८६/११, १८६/८, १६०/८, १६५/१५

(६) प्र+अशान=प्राशान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निरुक्ते दार्शनिकं तत्त्वम्

--मञ्जु कुमारी पाण्डेय, शोधछात्रा
C/o श्री डॉ. रामाशीष पाण्डेयः
राँची विश्वविद्यालयः, राँची (झारखण्डप्रदेशः)

दृश्-धातोर्ल्युट्-प्रत्ययेन निष्पन्नस्य दर्शन-शब्दस्यार्थो भवति तत्त्वानां प्रत्यक्षीकरणं तत्त्वानामवलोकनम्। संसृयत इति संसारस्तत्र प्रसृतानां स्थूलतत्त्वानां सूक्ष्म तत्त्वानाञ्चा-वलोकनं दर्शनमेव। स्थूलतत्त्वावलोकनेन स्थूलानां पदार्थानां जगति प्रसृतानां ज्ञानं भवति सूक्ष्म-तत्त्वावलोकनेन स्थूलाद् भिन्नानां सूक्ष्मतत्त्वानां ज्ञानं भवति।

तत्त्वानां ज्ञानमेव दर्शनस्य मूलप्रयोजनमस्ति। जगति जडरूपेण चेतनरूपेण च द्विधा तत्त्वानि प्रसृतानि सन्ति। 'तत्त्वज्ञानान्निः श्रेयसाधिगमः' इति यदुच्यते तद् दर्शनस्य सामान्यं विशिष्टञ्च प्रयोजनम्। तत्त्वानि निरपेक्षभूतान्यपि परस्पर-सहयोगेन जगन्निर्माणे सञ्चालने च तत्पराणि सन्ति। अचेतन-तत्त्वेन निर्मितमिदं वैविध्यपूर्ण जगत् तादृशं रूपं धारयति, येन वयं पश्यामो यत् भिन्नरूपावलोकनेन अचेतनमपि चेतनवत् प्रतीयते अचेतनस्य परिणतिश्चेतनमिति दार्शनिकं विवेचनम्। जगतः कारणं चेतनमेव वास्तविक-तत्त्वेन विराजते, यद्यपि तदचेतनरूपेण प्रतीयते।

अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तमिति निरुक्तं यथार्थतोऽर्थप्रकाशकं शास्त्रं विद्यते। वेदेभ्यः समाहृतानां शब्दानां निघण्टुपद-वाच्यानां निर्वचनमेव निरुक्तमस्ति। अर्थस्य प्रकाशने समर्थेऽस्मिन् निरुक्ते दृश्यते दार्शनिकं तत्त्वमपि प्रभूतम्। यतो हि वेदस्य शब्दा दार्शनिक तत्त्वेन प्रभाविता विद्यन्ते। निरुक्तेशास्त्रे प्रतिपादित मस्ति। यत्—

महाभाग्याद् देवताया एक आत्मा बहुधा स्तूयते। एकस्यात्मनोऽन्ये देवा प्रत्यङ्गानि भवन्ति।

अनेन निरुक्तवचनेन निरुक्तस्य एकेश्वरवादत्वं ज्ञायते। तत्रैव प्रतिपादितमस्ति—

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥

—ऋ० १/१६४/४६

वस्तुतो देवता रूपेण स्तुताः सूर्यादयो देवाः कार्यभिन्नत्वेन भिन्नाकारतां दधतीति देवानाम् एकेश्वरवादत्वेऽपि बहुदेववादत्वम्। आत्म-विषये निरुक्तस्य विचारो वर्तते। यत्—

'आत्माऽततेर्वा, अपि वाप्त इव स्याद्, यावद् व्याप्तिभूत इति।'

पाशुपतसूत्रस्य कौण्डिन्य-भाष्ये उद्धृतेन श्लोकेनानेन तस्यैव मतस्य पुष्टिर्भवति—

'यदाप्नोति यदादत्ते यच्चातिविषयान् पुनः।
यच्चास्य सततं भावस्तस्मादात्मेति संज्ञितः॥'

— पा. सू. कौ. भा.

निरुक्तमतेन आत्मा भवति सर्वव्यापको गतिशीलश्च। व्यापकत्वं तु अचेतनेऽपि प्राप्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यतो हि प्रत्येकस्मिन् कार्ये प्रकृतिर्व्याप्ता विद्यते। परमतनं गमनं गतिशीलत्वं चेतनस्यैव वैशिष्ट्यम्। अतः आत्मा चेतनतत्त्वमेव। व्यापकताया कारणेन चेतनोऽपि आत्मरूपेण कथ्यते।

यास्कः शरीरे तत्त्वद्वयं स्वीकरोति। स्थूल-शरीरम् शरीरस्थं जीवञ्च। इन्द्रियप्राणादिभिर्युक्तं शरीरं नश्वरं विविधक्रियायाः साधनमस्ति। आत्मनोऽधिष्ठानं शरीरमेव। शरीरे स्थित-मविनाशितत्त्वं जीवरूपम्। निरुक्ते कथितमस्ति यद् तस्य विनाशिधर्म तदक्षरं भवति। प्रज्ञया कर्म कारयतीति। जीव एव कर्मणः भोक्ता च विद्यते। यतो हि जीवेन प्रज्ञया च प्रेरितानीन्द्रियाणि कर्म सम्पादयन्ति। परमात्मा फलस्य भोक्ता न भवति। यथा निरुक्ते—

'द्वौ द्वौ प्रतिष्ठितौ सुकृतौ धर्मकर्तारौ दुष्कृतं पापं परिसारक्मित्याचक्षते। सुपर्णा सयुजा सखायेत्यात्मानं परमात्मानं प्रत्युपतिष्ठति। शरीर एवं तज्जायते वृक्षम्—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्यनश्ननन्यो ऽअभिचाकशीति॥

—नि० १४/३०

मन्त्रोऽयं वेदान्तेऽपि प्राप्यते। श्वेताश्वत-रोपनिषदि एतस्य मन्त्रस्योल्लेखोकठोपनिषदि दृश्यते।

'मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः।
महतः परमव्यक्तमव्यक्तात् पुरुषः परः॥

—कठोपनिषद् १/३/१०, ११

पुनश्च—

इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम्।
सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम्॥

—कठोपनिषद् २/३/७

ब्रह्म-विषये निरुक्तस्य मतमस्ति —

सर्वतः परिवृढं भवति तदेव ब्रह्म। अथैष महानात्मा तत् सत्यम्, तत् सलिलम्, तदव्यक्तम्, तदस्पर्शम्, तदरूपम्, तदरसम्, तदगन्धम्, तमृतम्, तदच्छक्यम्, तन्निष्ठौ भूतात्मा।'

निरुक्ते शरीरस्थस्यात्मनो रूपद्वयं वर्णितम्। तन्न जागृतोऽस्वप्नजौ सत्रसदौ च देवौ प्राज्ञश्चात्मा तंजसश्च। बृहदाण्यकोपनिषदि—

'एवमेवायम्पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किंचन वेदनान्तरम्। तद्वा अस्यैं तदाप्त-कामम्। आत्मकामम् अकामं रूपं शोकान्तरम्।'

निरुक्ते प्राप्यते यद् ज्ञाने निवसन् पुरुषः विविधैः शारीरिक-दुःखै मानसिकद्वन्द्वैश्च तावत् कालं पीडितो भवति, यावदावागमनचक्रात् स मुक्तो न भवति। अज्ञानी पुरुषो हिंसाया आश्रय गृह्णाति, येन स कल्याणं न प्राप्नोति। स्थूलं शरीरं परित्यज्य स धूममार्गेण गच्छति। यो हि हिंसायाः परित्यागं कृत्वा ज्ञानमार्गोक्तकार्यं करोति, स अर्चिमार्गेण गच्छति। ऊर्ध्वगामिनो जीवस्य मार्गद्वयं छान्दोग्योपनिषदि बृहदारण्य-कोपनिषदि च प्राप्यते। धूममार्ग-विषये यास्कः कथयति-

'अथ ये हिंसामाश्रित्य विद्यामुत्सृज्य महत्तपस्तेपिरे। चिरेण वेदोक्तानि वा कर्माणि कुर्वन्ति, ते धूममभिसंभवन्ति। धूमाद् रात्रिम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रात्रेः अपक्षीयमाणपक्षम्, अपक्षीयमाणपक्षाद् दक्षिणायनम्, दक्षिणायनात् पितृलोकम्, पितृलोकाच्चन्द्रमसम्, चन्द्रमसो वायुम्, वायोर्वृष्टिम्, वृष्टेरोषधयश्चैतद् भूत्वा तस्य संक्षये पुनरेवेमं लोकं प्रतिपद्यन्ते । तत्रैवार्चिमार्गविषये निम्नाङ्कितं वर्णितमस्ति—

'अथ ये हिंसामुत्सृज्य विद्यामाश्रित्य महत्तपस्तेपिरे, ज्ञानोक्तानि वा कर्माणि कुर्वन्ति, तेऽर्चिरभिसंभवन्ति, अर्चिषोऽहः, अह्नः आपूर्यमाणपक्षम्, आपूर्यमाणपक्षादुदगमनम्, उदगमनाद् देवलोकम्, देवलोकादादित्यम्, आदित्याद् वैद्युतम्, वैद्युतान्मानसम्, मानसाः पुरुषा भूत्वा ब्रह्मलोकमभिसंभवन्ति ते न पुनरावर्तन्ते शिष्टाः ।'

छान्दोग्योपनिषद्यपि वर्तते —

'आदित्याच्चान्द्रमसम्, चन्द्रमसो विद्युतम्, तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयति ।' बृहदारण्यकोपनिषदि 'आदित्याद् वैद्युतम्, वैद्युताद् पुरुषो मानस एत्य ब्रह्मलोकान् गमयति । ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति, तेषां न पुनरावृत्तिः ।' अनेन निरुक्तप्रतिपादिता धूममार्गोऽर्चिमार्गश्च उपनिषत्स्वपि वर्णितः वर्तते । मानसपुरुषस्य वर्णनमपि तत्र प्राप्यत एव ।

बृहदारण्यकोपनिषदि मधुविद्या चर्चिता वर्तते । यथा—

'स वा अयमात्मा सर्वेषां भूतानामधिपतिः, सर्वेषां भूतानां राजा । तद्यथा रथनेमौ चाराः सर्वे समर्पिताः भवन्ति । एवमेवास्मिन्नात्मनि सर्वाणि भूतानि, सर्वे देवाः, सर्वे लोकाः सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः ।' निरुक्तेऽपि मधुविद्या चर्चितास्ति । यास्कः सर्वेषु पदार्थेषु आत्मनः स्थितिं स्वीकरोति । यथा—

'आत्मा ब्रह्मेति, स ब्रह्मभूतो भवति । साक्षिमात्रो व्यवतिष्ठते । स्रष्टा, द्रष्टा, विभक्तातिमात्रोऽहमिति गम्यते । सोऽयं पुरुषः सर्वमयः सर्वज्ञानोऽपि कल्पतः ।'

निरुक्ते पुरुषः 'पुरिशयः' इति व्याख्यातोऽस्ति । पुरि शरीरे शेते यः स 'पुरिशयः' पुरुषः । निरुक्तमतेनस्तूयमानोऽयमेवात्मा सर्वमेतदनुभवतीति संक्षेपतो निरुक्ते दार्शनिकं तत्त्वं विवेचितम् ।

स्मरामि परमाचार्यान्

—श्री पं० रवीन्द्रनाथः गुरुः
राजबोड़ासम्बरम्–७६८०३६
बरगड़ (उडीसा प्रदेशः)

(१)

अखण्डमेधाविन आत्मनिष्ठान्
आचार्यवर्यान् सततं स्मरामि ।
इष्टप्रदान् जाह्नवीनिष्ठसाधून्
ईशानरूपान् शिवसौम्यमूर्त्तीन् ॥

(२)

उद्धारकान् सिद्धिदचारुहासान्
ऊर्जोनिधानान् करुणार्द्रदृष्टीन् ।
ऋग्वेदविद्यामृतशुद्धचित्तान्
ऋचन्द्रमौलीन् सततं स्मरामि ॥

(३)

लृ-संस्तुतान् वै प्रथितप्रभावान्
लृवाक्स्वरूपान् शिवदान् सुबुद्धीन् ।
एकान्तवासान् जयदान् यतीन्द्रान्
ऐश्वर्यपादान् सततं स्मरामि ॥

(४)

ओजोमयान् चन्द्रसरस्वतीन्द्रान्
औपासनाभीष्टफलप्रदातॄन् ।
अद्वैतसम्बोधसमुद्रचन्द्रान्
अनन्यभक्त्या सततं स्मरामि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लोकतन्त्र-शतकम्

—डॉ० निरञ्जनमिश्रः, प्रवक्ता
भगवानदास- केन्द्रिय- आदर्श-संस्कृत-महाविद्यालयः
प्राचीनावधूतमण्डलाश्रमः, हरिद्वारम् (उत्तराञ्चलम्)

(३२)

मेघः कः ? स्वविधायकः किममृतं ?
दिव्यं तदीयं वचः,
क्षेत्रं किं जनता-मनः, करतल-
ध्वानञ्च वृष्टिस्वनम् ।
ध्वानं किं ? जनता-हिताय सततं
तस्य प्रतिज्ञापनम्,
वात्या[1] का ? जन-सङ्कुलं तडिदिति-
च्छायाकराणां प्रभा ।।

(३३)

यथात्र राजा जनता तथैव
नियन्त्रको नो न नियन्त्रिता च ।
यथा धियस्ते निजकार्यलग्नाः
देशस्य भाग्ये विधिरेव मानम् ।।

(३४)

स्वतन्त्रतायाः ग्रहणे समेषां
स्वर्गालयं वै पितरः प्रयाताः ।
स्वतन्त्रतेयञ्च गृहीत-केशा
कथन्न भोग्या स्वधिया सुतेभ्यः ? ।।

(३५)

इयं दुष्टा नारी निजनवलदेहं नयनयो-
र्नियोज्य प्रीत्यंव प्रतिजनपदं सङ्गरमुखे ।
निपात्य प्रीतेयं स्खलितपरबन्धा स्मितमुखी
जनानामाक्रोशं जनयति मृतानां तनुभुवाम् ।।

(३६)

यामाप्तुं पितरो यमस्य सदनं प्रापुः पुरा सङ्गरे
सा काचिन्नवयौवना स्मितमुखी लावण्यपूर्णा नदी ।
स्वीयं यौवनभारमेव वहनेऽशक्ता स्खलन्ती यदा
आयाता नयने तदा स्थितजनैरास्वादनीया नु किम् ।।

(३७)

विदितजनकमृत्युः कारणञ्चाभिगम्य
द्विगुणितनिजरोषः हन्तुमेव प्रवृत्तः ।
विचलित-वदनेयं चाश्रुपूर्णाऽऽश्रयाय
व्रजति यदि कुतश्चिन्नैव रक्ष्या कदाचित् ।।

(३८)

स्वतन्त्रतेयं निज-रूपवह्ना-
वज्वालयल्लोकवर-प्रवीरान् ।
नग्नामिमां ताडयतीह मार्गे
नेता तदौचित्यमिदं कथन्न ? ।।

(३९)

स्वतन्त्रतायाः परिणीत-भर्ता,
नेता स्वबुद्ध्या परिरक्षतीमाम् ।
स्नेहेन वा पश्यतु रोष-दृष्ट्या
जाया-विधौ लब्धकरः प्रमाणम् ।।

(४०)

राजा स्वतन्त्रो जनता स्वतन्त्रा
नारी स्वतन्त्रा पुरुषः स्वतन्त्रः ।
गुरुः स्वतन्त्रः शिशवः स्वतन्त्राः
विद्या स्वतन्त्राऽभ्यसनं स्वतन्त्रम् ।।

१— झंझावात्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(४१)

स्वतन्त्र–रूपेण वहन्ति नद्यः
स्वतन्त्र–रूपेण घनागमश्च ।
स्वतन्त्र–रूपेण हि धान्य-वृद्धिः
स्वलोकतन्त्रे न हि कः स्वतन्त्रः ? ॥

(४)

लता स्वतन्त्रा विटपः स्वतन्त्र–
स्तथैव भृङ्गाश्च पिकाः स्वतन्त्राः ।
लताऽवला चुम्बन-कर्म दक्षः
मद–प्रमत्तः पवनः स्वतन्त्रः ॥

(४३)

न्यायावलीयञ्च यथा स्वतन्त्रा,
स्वतन्त्रतायाञ्च तथैव चौराः ।
वणिक् स्वतन्त्रः खलु पण्यकर्मणि
संवट्टनार्थं स्वधियैव वस्तुनः ॥

(४४)

यथा स्वतन्त्रः खलु वैद्यराज–
स्तथैव रोगो निज–रूप–वृद्धौ ।
सर्वे स्वतन्त्राः निज–कार्य–वृत्तौ
स्वयं स्वतन्त्रः परतन्त्रतायाम् ॥

(४५)

नेता स्वार्थमचिन्त्यनीतिकरणे नैव क्षमो दृश्यते
सर्वेषामपि चित्तकर्षणविधिं त्यक्तुं न वा वाञ्छति
सा नीतिस्सरला च दिव्यफलदोत्थानप्रिया भासुरा,
या स्वार्थं परिपोष्य मूर्खजनताचित्तं समाह्लादयेत् ।

(४६)

देशस्था जनता विलोक्य गगने पुष्पं समाह्लादिता
नेतारं प्रणिपत्य लम्बवदना संस्वीकरोति प्रभुम् ।
ऊर्ध्वं पश्यति यावदेव जनताऽऽधारात्मक भूतलं
नीत्वा तावदितः प्रयाति भवनाद् दूरं तदीयःप्रभुः ॥

(४७)

बलीवर्दो भारं वहति यशभागी भवति कः ?
तदीयः स्वामीति प्रभवति हि तन्त्रं समगतिः ।
प्रजास्कन्धे स्थित्वा वहति निजभारं, भवति सः
श्रमक्लान्तः, श्वावत् श्रमपथविहीनोऽप्यति जवः ॥

(४८)

बुभूक्षा–सन्दष्टा भ्रमति जनतेयं पथि पथि
सुपक्वं भोज्यान्नं घृत–दधि–सूपूर्णं प्रतिनिधेः ।
इतः कुब्जः खञ्जो गलिततनुकुष्ठी प्रतिपदं
ततो वै प्रासादे प्रमुदिततनुर्यौवनरसी ॥

(४९)

विमाने साह्लादं व्रजति जननेता स्वनियतं
सदा स्थानं, देश वदति, कथयामि प्रतिदिनम् ।
त्वदीयं दारिद्र्यं विघटयितुमेव श्रम–रतो
विनिद्रः कार्यार्थी क्वचिदपि विरामं न हि लभे ॥

(५०)

भवतु दिवस-भर्ता वौषधीशो निशायां
मधुप–मनसि खेदो नैव किञ्चित् कदापि ।
कमल–कुल–कुमारी, चुम्बने चन्द्र–कान्ता
उभय–समयलब्धा तावुभौ तुल्यमानौ ॥

(५१)

जन–हित–भरितेऽस्मिन् पूजिते लोकतन्त्रे
विदित-बहुदलानां शासकः स्यात्तु कोऽपि ।
भवति कुशल–दैन्यं नैव नेतुर्विलासे
दिवस-रजनि भेदं नैव जानाति भृङ्गः ॥

(५२)

अयि सुरगण ! लोके लोकतन्त्रं विधाय
सुरपति-पदभारान्मुक्त-भावं प्रयाहि ।
पति – पदमुपगन्तुं लोकतन्त्रादृतेस्मिञ्
जगति नहि विधात्रा कल्पितोऽन्यो विकल्पः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(५३)

शकारः शासको यत्र राजनीतिस्तु कुट्टिनी ।
विट–चेटाः प्रजा यत्र तत्र वेश्या स्वतन्त्रता ।।

(५४)

विगलित-नय-बन्धं सर्वतन्त्र-स्वतन्त्रं
निज–जन -हित-सिद्धौ सिद्धिदं मूलमन्त्रम् ।
विष-भरितगलञ्च प्राप्त-चन्द्रं ह्यतन्द्रं
सुखयति नहि को भो ! सर्वदं लोकतन्त्रम् ।।

(५५)

भ्राता व्याध–समः पिता ह्यहि-समो
माता यथा पन्नगी,
जाया शोणित-पान-मत्त-नयना,
श्येनः सुतो धर्मजः ।
वृत्तिश्चित्तगता सदा नव–नव–
ग्रास-प्रसक्ताऽभवत्,
यस्यैते प्रभवन्ति दैव–वशतो
नेता समर्थो हि सः ।।

(५६)

विघ्नस्य विघ्न-भूताय श्वेत–वस्त्र–धराय च ।
लोक–तन्त्रस्य देवाय भूयो भूयो नमो नमः ।।

(५७)

'वोटास्वादपरो विचारविमुखः 'कुर्सी'-प्रियो मोहनः
दक्षो देशजनानुरञ्जनविधौ सिद्धेन्द्रजालप्रियः ।
स्वायत्तीकरणे हि यस्य कुशला बुद्धिस्सदा भाषणे
सोऽयं नेतृवरः सदोच्चगमने लब्धावकाशो भवेत् ।।

(५८)

लोकतन्त्रस्य हट्टेऽस्मिन् पण्यं शासनसूत्रकम् ।
स क्रीणाति हि राज्यत्वं यो वाणिज्यविधौ क्षमः ।।

(५९)

सद्वृत्ति–दर्प-दलनाय कृत–प्रयासः
दुर्वृत्ति–वारवनिता-विहितो विलासः ।
सत्कर्म चन्द्र-किरणाय घनागमोऽयं
दुष्कर्मपद्म–विपिनाय रविप्रकाशः ।।

(६०)

विधावारि-मरुस्थली सुजनतापद्मावलीनां शशी
स्वार्थान्धा ह्यभिसारिका चटुलता गन्धोत्कटा हस्तिनो
मिथ्या नर्तनमन्दिरं सुचरितां ध्यस्थली सङ्गता
सत्यार्थं विषवल्लरी गुणिजनानामन्धदा यामिनो ।।

(६१)

वने वने याति यथा मधुप्रिय–
स्तथैव नेता सततं दले दले ।
यथा न चम्पे मधुप-प्रवास–
स्तथा न सत्ये वसतीह नेता ।।

(६२)

कांङ्ग्रेसे भारतीये वा राष्ट्रीये जनता दले ।
कम्युनिष्टे तथा चान्ये याति नेता स्वलोभतः ।।

(६३)

अयि गगन–विहारिन् ! पश्य मे लोकतन्त्रं
भवति न हि निराशः कोऽपि नेता कदाचित् ।
यदि भवति कदाचित् प्रीतिपूर्णा जयश्रीः
त्यजति न हि पुनस्सा भर्तृगेहं सतीव ।।

(६४)

वसति च रसनायां शारदा सुप्रसन्ना
जलनिधि-तनु-जाताऽप्यत्र गेहे प्रसन्ना ।
कविवर-कथनं यच्छङ्गमं वाणिलक्ष्म्यो-
र्नहि भवति कदाचिल्लोक–तन्त्रेऽस्त्यसत्यम् ।।

[क्रमशः]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चनदो देशः

—डॉ० सावित्रीदेवी शर्मा, वेदाचार्या
१०, केला बाग, बरेली (उ०प्र०)

(१)

कैरद्य समाक्रान्तः पश्यत
वीराणां पञ्चनदोदेशः ।
यत्रायं 'हा हा' त्राहि त्राहि
जनताक्रान्तः दुःखमयः क्लेशः ॥

(२)

या वीरप्रसूः जननी ख्याता
बलवीर्यपराक्रमसंवलिता ।
दिव्याविश्रुतगौरवगाथा
नरसिंहप्रभावमयी धरणी ॥

(३)

कथमद्य लुण्ठिता पददलिता
दीना हीना व्याकुल वदना ।
चीत्कारवचोभिः दयासिन्धुं
भीताऽशरणाऽऽकारयति प्रभुम् ॥

(४)

का दशा भविष्यति देशेऽस्मिन्
पालका हिसकाः संजाता ।
मंचासीना मंत्रिवरा
शपथं गृह्णन्ति प्रसन्नमुखाः ॥

(५)

नहि कश्चित् राष्ट्रपतिः देशे
रक्षकः प्रधानमंत्रिवर्यः ।
दूयेत प्रधानः दूयेत प्रजा
कष्टं श्रुत्वारक्षेत् सदा सदयः स्वामी ॥

(६)

निर्वाचन- काले राजपथे
याचन्ते सत्यं मतदानम् ।
अधुना ते उच्चपदारूढाः
पश्यन्ति न लोकहितं मूढाः ॥

(७)

रावणाः मदोन्मत्ताः कंसाः
संजाताः सिंहासन कामाः ।
पदलोलुपता सत्ता लक्ष्यं
सर्वत्र दृश्यते दानवता ॥

(८)

कीदृशी धर्मग्लानिः जाता
सर्वत्र दृश्यते दानवता ।
साक्षरा राक्षसाः उग्रवाद कर्मणि
निष्णाताः सञ्जाताः ॥

(९)

आतङ्कवादिनः क्रूरमनाः
सन्तापर्यान्त निजबन्धु गणम् ।
प्रियभ्रातरमेव हन्ति भ्राता
मित्रो मित्रस्य घातकोऽयम् ॥

(१०)

के सन्ति दस्यवः पाप-रता
नैषां सौहार्दगुणो दृष्टः ।
हिंसा-दमनं क्रौर्य-हननं
कीदृशी वासना नाशकरी ॥

(११)

नैते परमोदाराः आर्या वक्तुं शक्या शिवसंकल्याः ।
एते तु यवन-हतकाः नूनमार्यत्वद्वेषिणो दुष्टजनाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतवाङ्मये जलविज्ञानम्
(प्राकृतिक-स्रोतांसि जलञ्च)

–डॉ० रामसुमेरयादवः
प्रवक्ता, संस्कृतविभागे
राजकीयस्नातकोत्तर महाविद्यालयः
उत्तरकाँशी, (उत्तराँचल प्रदेशः) २४६१९३

तापेनाकुलाः जनाः पशवः पक्षिणः वृक्षाः वीरुधश्च जलमाश्रयन्ति। निश्प्रचमेव निगदितुं शक्यते यत् जलमेव जीवनं सर्वेषाम्। जलं विना नैव हि स्थातुं कोऽपि जन्तुः सृष्ट्यादौ परमात्मना जगतः गर्भं दधानाः अमृतरूपाः ऋतज्ञाः आपः विश्वं ररक्ष। व्यवस्थेयं परब्रह्मणा सञ्चालिता जलस्योत्पादनशक्त्यैव सृष्टिः समुत्पादिता। हिमाद्रि–कूप-औद्भिद–सर–तडाग–प्रासवणादयः जलस्रोतस् रूपेणावबुद्ध्यन्ते अथर्ववेदे एकोनविंशतिकाण्डे–

'शं ते आपो हैमवती शमु ते सन्नूत्स्याः
शं ते सनिष्यदा आपः शमु ते सन्तु वर्ष्याः ॥'

हिमाद्रेः समुत्पन्नानि जलानि शान्तिदायकानि सन्तु। कूपेभ्यः निर्गतानि जलानि शान्तिकारकानि सन्तु। त्वरित–

गत्या जलानि शान्ति–प्रदायकानि भवन्तु। वर्षाभ्यः समुत्पनानि जलानि शान्तिमयानि सन्तु। तथा च

'शं ते आपो धन्वन्या शं ते सन्त्वनूप्याः।
शं ते खनित्रिमा आपः शं याः कुम्भेभिराभृताः।
अनश्रयः खनमाना विप्राः गम्भीरे अपसः ॥
भिषग्भ्यो भिषक्तरा आपो अच्छा वदामसि ॥
अपामह दिव्यानामपां स्रोतस्यानाम्।
अपामह प्रणेजनेऽश्वाभवच्च वाजिनः।
ता अपः शिवा अपोऽयक्ष्मं करणीरपः।
अथैव तप्यते मयस्तास्त आ दत्त भेषजोः ॥'

यदा पयोदाः कोमिल मिथः घर्षणं कुर्वन्ति, वर्षन्ति च तदैव जलं पृथिव्यामेकलीभूय नादं विदधत् प्रवहति। अतः नदीसंज्ञया ज्ञायते नाम। अथर्ववेदे—

'यददः सम्प्रयतीरहावनदता हते तस्मादा नद्यो नामस्थ ता वो नामानि सिन्धवः।

आपः शब्दः आप्तृ–व्याप्तौ धातोः निष्पद्यते। यदा सूर्य–शक्त्या जलं वसुन्धरायामागत्य विस्तारं याति। ततः जीवः तत्प्राप्नोति—

'यत्प्रेषिता वरुणेनाच्छीवं समवल्गत।
सदाप्नोदिन्द्रो वो यतीस्तस्मादापोऽनुष्ठन् ॥'

मानवः भूमौ अन्नादये सूर्यश्चाकाशे वृष्टये जलमभिलषति। अस्मात् जलस्य नाम 'वारि' इति सङ्गच्छते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'अपकामं स्पन्दमाना अवीवरत् वो हि कम् ।
इन्द्रो वः शक्तिभिर्देवीस्तस्माद् वा नाम वो हितम् ।।'

ईश्वरस्य सामथ्येन जलं सूर्यरश्मिभिः आकाशं याति । अतः तदुदकमपि कथ्यते—

'एको वो देवोऽप्यतिष्ठत् स्यन्दमाना यथावशम् ।
उदानिषुर्महीरिति तस्मादुदकमुच्यते ।।'

जलादेव धृतादिकं समुपाद्यते, इत्यपि प्रतिपादितं वर्तते । यथा—

'आपो भद्रा घृतमिदाय आसन्नग्नीषोमौ विभ्रत्याप इत ताः । तीव्रो रसो मधुपृचामरङ्गम आ मा प्राणेन सह वर्चसा गमेत् ।।'

जलस्य यथावत् प्रयोगेण प्राणिषु दर्शनशक्तिः, श्रवण-शक्त्यादयः स्वतः समायन्ति । यथा—

'आदित प्रश्नाम्युत वा शृणोम्या मा घोषो गच्छति वाङ्मानसाय । मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृप यदा वः ।।'

कृषिकर्मसु औषधादिषु जलस्य प्रयोगेण सुखमनुभवन्ति मानवाः । यथा—

'इदं व आपो हृदयमयं वत्स ऋतावरीः ।
इहेत्थमेतत् शक्वरीर्यत्रेदं वेशयामि वः ।।'

सृष्ट्यादौ बीजं संधारयत् जीवनशक्ति-संधारकाः ऋतज्ञाः आपः विश्वं रक्षितवान् । ऋग्वेदे वर्णितं यथा—

'आपोऽअग्रे विश्वमावन् गर्भं दधानाः अमृता ऋतज्ञाः । यासु देवीष्वधि देव आसीत्, कस्मै देवाय हविषा विधेम ।।

जलस्योत्पादनशक्त्यैव संसारोऽयं समुत्पन्नः सृष्टेरादि परमेश्वरः यथाथर्ववेदे—

'आपो वत्सं जनयन्तीर्गर्भमग्रे समैरयन् तस्योत् जायमानस्योल्व आसीद् हिरण्मयः कस्मै देवाय हविषा विधेम ।।'

जलानमुत्तमगुणेन मानवाः ऐश्वर्यशालिनः बलवन्तः भवन्ति । यथा—

'अपां रसः प्रथमजोऽपो वनस्पतीनाम् ।
उत् सोमस्य भ्राता स्युः तार्शमसि वृष्ण्यम् ।।'

राजसिंहासनेन अलङ्कर्तुम् ओषधीनां रससिक्तैः वृष्टि–नदीकूपादीनां जलैः स्नानार्थं निर्देशः अथर्ववेदे प्राप्यते । यथा—

'या आपो दिव्याः पयसा मदन्त्यन्तरिक्षं उत वा पृथिव्याम् । तासां त्वा सर्वमयासि षिञ्चामि वर्चसा ।।'

जलधाराः, विद्युदः, मेघाः, वर्षाजलानि उत्साः समेषाः जगतः कल्याणायोपकुर्वन्ति । यथा-

'आपो विद्युदभ्रं वर्षं स वोऽवन्तु सुदानव अजगरा उत् । मरुद्भिः प्रच्युता मेघाः प्रावन्तु पृथिवीमनु ।।'

अस्माकं पिता प्राणदाता मेघोऽपि जलधाराः निषिञ्चन् जलानां गर्गराः सदैव समाश्वसन्तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथाथर्ववेदेऽव लोकनीयम्—

'अपो निषञ्चन्मिसुरः पिता नः श्वसन्तु गर्गराः
अपां वृणा वो नीचीरपः सृजं वदन्तु
पृश्निवाहवो ॥ मण्डूकी हरिणतु ॥'

सूर्यरश्मिभिः साधं वाय्वृणाः जलं व्योमे नयन्ति । तेषाम् उपकारैः जलानि समुदितानि भवेयुः । यथा—

'अपः समुद्रात् दिवमुद्वहन्ति दिविस्पृथिवीं मभि मे सृजन्ति । ये अद्भिरीशानाः मरुतश्चरन्ति ते नो मुञ्चन्त्वं हसः ॥'

व्यापक-शक्ति-समन्विताः जलधाराः हिमवतः पर्वतेभ्यः प्रस्रवन्ति । अथर्ववेदे यथा—

'हिमवतः सिन्धोः समुद्र संगमः । आपो ह मध्यं तद् देवीर्ददन् हृद्द्योत भेषजम् ॥'

जनाः वेदविहितानि कर्माणि विधाय स्वात्मनः आत्मिकान् शारीरिकान् च दोषान् जलचिकित्सया विनश्यन्ति । यथाथर्ववेदे—

'आप इद् वा उ भेषजीरापो अमीवचातनीः ।
आपो विश्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम् ॥'

गृहपतयः रोगेभ्यः मुक्तये स्वास्थ्यस्य सम्बधनाय उत्तमजलं प्रयोगे आनयन्तु । एतद्विषयेऽथर्ववेदे भूयासः अर्थाः प्राप्यन्ते । यथा—

'इमाः आपः प्र भराम्यक्ष्मा यक्ष्मनाशनीः ।
गृहानुप प्र सीदाम्यमृतेन सहाग्निना ॥'

सामवेदे जलस्य विषये विस्तृतवर्णनं प्राप्यते, जलं निःसन्देहरूपेण सुखप्रदायकं बलवर्धकञ्च भवति । यथा—

'आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ।
महे रणाय चक्षसे ॥' —सामवेद

अर्थात् हे जलानि ! तव रसः अत्यन्तरूपेण सुखप्रदायकानि सन्ति । तं सेक्तायास्मभ्यं देहि । बालानां पोषणार्थम् इच्छन्तीवती माता स्वदुधारसं स्वकीयशिशवे ददाति, तथैवास्मभ्यं देहि । यथा सामवेदे—

'यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः । तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा चनः ॥'

सामवेदे एव पवित्रबलसंधारकान् मित्राणि हिंसकशत्रूणां नाशकं वरुणमाह्वयामि, मित्रवरुणौ जलमुत्पाद्य स्वकार्य साधयतः । यथा—

'मित्र हुवे पूतदक्षं वरुणं च रिशादसम् ।
धियं घृताचीं साधन्ता ॥'

मित्रावरुणौ च सत्यं सम्बन्धकौ स्तः सत्यं सार्थकं कर्तारौ जलस्य । यथा—

'ऋतेन मित्रावरुणावृतावृधावृतस्पृशा ऋतुं बृहन्तमाशाथे ॥'

दूरदर्शीनि अनेकानि कार्याणि जलयोगीनि सन्ति केषु स्थानेषु भवति जलम् । भवतावपि मित्रवरुणौ अस्माकं बलं कार्यञ्च पुष्णीतः । यथा—

मित्रावरुणा तुविजातो उरुक्षया दक्षं दधाते अपसम् ।

सुश्रुतसंहितायां वर्षर्तौ आश्विनमासे आन्तरिक्षजलं सेवनीयम् । हेमन्ततौ सरोवराणां जलमुपासनीयम् । वसन्ततौ कूपानां वारि गृहीतव्यम् । ग्रीष्मर्तौ निझराणां जलमास्वादनीयमिति स्पष्टरूपेणोपलभ्यते । 'तत्र वर्षास्वान्तरिक्षमौद्भिदं वासवेत महागुणत्वात्, । शरदि सर्वं प्रसन्नत्वात् हेमन्ते सारसां ताड़ागं वा, वसन्ते कौपं प्रास्रवणं वा ग्रीष्मेऽप्येवं प्राभृषि चौष्ण्यमनुभिवृद्धं सर्वं चेति ।

[क्रमशः]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट सं–५, झण्डेवालान, नई दिल्ली–११०००५

आवश्यक सूचना

दिल्ली संस्कृत अकादमी की संस्कृत भाषा में लघु कथाओं एवं लघु नाटकों के सम्पादन एवं प्रकाशन करने की एक महत्त्वाकांक्षी योजना है। जिसके लिए संस्कृत के लेखक/लेखिकाओं से संस्कृत भाषा में मौलिक लघु कथाएं एवं लघु नाटक आमन्त्रित किये जाते हैं। लघु कथाओं के लिए अधिकतम टंकित तीन पृष्ठ एवं लघु नाटकों के लिए अधिकतम छः पृष्ठ निर्धारित किये गये हैं। कथा एवं नाटक की विषयवस्तु किसी व्यक्ति सम्प्रदाय व धर्म विशेष पर आक्षेप करने वाली नहीं होनी चाहिए। प्रकाशित रचनाओं पर अकादमी नीति के अनुसार मानदेय प्रदान किया जायेगा।

लघु कथा एवं लघु नाटक जमा करने की अन्तिम तिथि दिनांक १५-११-२००१ होगी। अनुपयुक्त रचनाओं को प्रकाशित करने के लिए अकादमी बाध्य नहीं होगी।

–श्रीकृष्ण सेमवाल

सचिव

दिल्ली संस्कृत अकादमी दिल्ली सरकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महाविद्यालय-समाचाराः

शिक्षकदिवसस्यायोजनम्-

५/९/२००१ तमे दिनाङ्के पूर्वराष्ट्रपतेः श्रीमतः डा० राधाकृष्णनमहोदयस्य जन्मदिवसस्य समुपलक्ष्ये शिक्षकदिवसस्यायोजनमभूत्। अवसरेऽस्मिन् अनेके वक्तारः परमदार्शनिकस्य डा० राधाकृष्णनमहोदयस्य जीवनस्य विविधानां घटनानां वर्णनं कृतवन्तः।

श्रीगोविन्दबल्लभपन्तस्य जन्मदिवसम्-

१०/९/२००१ तमे दिनाङ्के ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य रमणीये प्राङ्गणे उत्तरप्रदेश सर्वकारस्य प्रथममुख्यमन्त्रिणः श्रीमतः पंडित-गोविन्दबल्लभपन्तस्य ११४ तमः जन्मोत्सवः महता समारोहेण समायोजितः।

अवसरेऽस्मिन् समायोजिते जन्मदिवससमारोहे प्राचार्येण डा० हरिगोपालशास्त्रिणा कथितं यत् पं० गोविन्दबल्लभपन्तः एकः विशिष्टः विद्वान् राजनेता चासीत्। अमुष्य जीवनं सरलमासीत्। तस्य नेतृत्वे सर्वे विश्वासं कुर्वन्ति स्म। सर्वैरेवास्माभिः तेषां जीवनेन प्रेरणा प्राप्तव्या।

हरियज्ञशालायाः समुद्घाटनम्-

१७/९/२००१ तमे दिनाङ्के ज्वालापुरीय-महाविद्यालयसभाप्रधानेन श्री पं० हरवंशसिंह वत्स महोदयेन ज्वालापुरीय-गुरुकुलमहाविद्यालय-परिसरे विनिर्मितायाः 'हरि यज्ञशालायाः समुद्घाटनं सुसम्पादितम्।

अस्याः 'हरि-यज्ञशालायाः निर्माणे ११५०००/- रूप्यकाणां राशिः संस्थाप्रधानेन श्रीमता हरवंश-सिंहवत्समहोदयेन व्यक्तिगतरूपेण व्ययीकृतः।

अवसरेऽस्मिन् प्राचार्येण डा० हरिगोपाल-शास्त्रिणा महाविद्यालयसभा-प्रधानस्य महती प्रशसा कृता। गुरुकुलकांगड़ीविश्वविद्यालयस्योपकुलपतना वेदविदुषा प्रो० वेदप्रकाशशास्त्रिणाव सरेऽस्मिन् यज्ञमहत्त्वं प्रतिपादितम्। विशिष्ट-विदुषा श्रीजयदेववेदालङ्कारेणाऽपि वदमहत्त्वं प्रतियादयता कथितं यत् यज्ञशालायाः निर्माणेन ज्वालापुरीयगुरुकुलमहाविद्यालयस्य महत्या आवश्यकतायाः पूर्तिरभवत्। अवसरेऽस्मिन् नैके विद्वांसः समुपस्थिता आसन्।

संस्कारशास्त्र-कार्यशिविरस्यायोजनम्-

ज्वालापुरीय -गुरुकुलमहाविद्यालयोऽयं दिनांक २१/९/२००१ तः१०/१०/२००१ दिनाङ्क पर्यन्तं संस्कारशास्त्रमाश्रित्य कार्यशिविरं भारत सर्वकारस्य राष्ट्रियसंस्कृतसंस्थानस्य आंशिकार्थ साहाय्येन समायोजयते। अत्र प्रतिष्ठिताः अनुभव-विभवाः विशेषज्ञाः भारतीयसमाजस्य कृते संस्थापितानां सर्वेषां संस्काराणां सक्रिया-कलापं प्रशिक्षणं वितरिष्यन्ति। शास्त्र्याचार्य-कक्षीयछात्राः शिविरे भागं ग्रहीतुं प्रभवन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतदिवस-समारोहः सम्पन्नः

—डॉ० रामाशीषपाण्डेयः
सचिवः, संस्कृतसेवा-संघस्य
सी–११६, हरमू हाउसिंग कालोनी
राँची-८३४०१२ (झारखण्डप्रदेशः)

रांच्यां ४/८/२००१ दिनाङ्के राँचीस्थस्य संस्कृतसेवासंघस्य तत्त्वावधाने विशिष्टः संस्कृतदिवससमारोहः सुसम्पन्नः। तत्र झारखण्ड-प्रदेशस्य माध्यमिकशिक्षानिदेशकेन श्री वैदेही शरणमिश्र–(आई०ए०एस०) महोदयेनाध्यक्षता कृता। राँचीस्थराजकीयसंस्कृतमहाविद्यालयस्य शास्त्रचूडामणि–प्राध्यापकेन श्रीपण्डितरामानुग्रह-शर्मणा वैदिकं मंगलाचरणं कृतम्। नूतनस्मृत्या सरस्वती-वन्दना, तथा कुमारी अर्चनया स्वागत-गीतिः प्रस्तुता।

संघस्योपाध्यक्षेण डा० जयनारायणपाण्डेयेन समागतानां विदुषां स्वागतं कुर्वता कथितं यत् संस्कृतस्य प्रचारे प्रसारे सम्प्रति नानाविधाः समस्या विराजन्ते, तासां समाधानं विना नवगठितेऽस्मिन् झारखण्डप्रदेशे संस्कृतस्य विकासा नैव सम्भवः। संस्कृतसेवासंघस्य सचिवेन डॉ० रामाशीषपाण्डेयेन प्रतिवेदन–प्रस्तुतौ कथितं यत् संस्कृतसेवासंघोऽयं राज्यस्तरीयैः निखिलभारतीयैश्च संस्कृतसम्मेलनं संस्कृत–कार्यशालाभिर्विविधायोजनैश्च संस्कृतस्य प्रसाराय कटिबद्धो विद्यते। स्नातकोत्तरसंस्कृत-विभागीयाचार्येण डाक्टरराजेन्द्रप्रसाददूबे–महोदयेन कतिपयाः संस्कृतसम्बद्धाः समस्याः समुपस्थापिताः। राजकीयसंस्कृतमहाविद्यालयस्य प्रधानाचार्येण श्रीपण्डित–चन्द्रकुमारत्रिपाठिना झारखण्डप्रदेशे संस्कृतसंस्थासु 'वेतन'–वितरणस्य समस्या प्रकाशिता।

अध्यक्षीयभाषणे श्रीमता वैदेहीशरणमिश्रेण कथितं यत् झारखण्डप्रदेशस्य नवगठनमस्ति। याः समस्याः राज्ये विद्यन्ते, तासां समाधानं राज्यसर्वकारैः क्रियते। संस्कृतसम्बद्धा अपि समस्या विचारिता भविष्यन्ति, परं समस्यानां समाधाने नागरिकाणां सहयोगोऽपि नितरामपेक्षते। स्नातकोत्तर–संस्कृतविभागस्य प्राध्यापकेन श्रीमता डा० रामकुमार पाठकेन धन्यवादज्ञापनं कृतम्। वरिष्ठपत्रकारेण श्रीमता शैलेन्द्रभारद्वाजेनाभारप्रदर्शनं कृतम्। संस्कृतभारत्या समूहगानमथ चाभिनयस्य प्रदर्शनं कृतम्।

समारोहेऽस्मिन् सहाऽध्यक्षः डा० श्रीकृष्ण-पाण्डेयः स्नातकोत्तरस्य इतिहासविभागस्याचार्यः डा०बी०डी०दूबे, वाणिज्यसङ्कायाध्यक्षः डा० अमरनाथ चौबे, सन्त जेवियर-महाविद्यालयस्य संस्कृतविभागाध्यक्षः डा०मृगाङ्कभूषणनारायणमिश्रः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

BHARATODAYA
R. N. I. Regd No. UPBIL/1998/1485 Postal Regd. No. DN/RO-167/2001

योगदा – सत्सङ्गमहाविद्यालयस्य संस्कृत-विभागाध्यक्षः प्रो० धीरेश्वरझा 'सुधीरः' राँची- महाविद्यालयस्य संस्कृतविभागाध्यक्षः डा० चन्द्रकान्तशुक्लः, प्राध्यापिका डा० मीना शुक्ला, प्रो० सिनी मुण्डा, डा० जङ्गबहादुर-पाण्डेयः, डा० हरिहरकृपालुपाण्डेयः प्रभृतयः शताधिकाः संस्कृतबिद्वांसः समुपस्थिता आसन् । समग्रकार्यक्रमाः संस्कृतभाषायां सुसम्पन्नाः । कार्यक्रमस्य मञ्चसंचालनं डा० रामाशीषपाण्डेयेन विहितम् ।

समारोहेऽस्मिन् निम्नलिखिताः प्रस्तावाः सर्वसम्मत्या सर्वैः स्वीकृताः ।

१. मैट्रिक- इण्टर–परीक्षायां संस्कृतं पूर्ववदेव अनिवार्यभाषावर्गे भवेत् ।

२. झारखण्डप्रदेशे संस्कृतविश्वविद्यालयस्य स्थापना यथाशीघ्रं भवेत् ।

३. संस्कृतस्य प्रसाराय झारखण्डसंस्कृताकादम्याः संस्थापना भवेत् ।

४. उर्दूभाषा-शिक्षकाणामिव संस्कृत-शिक्षकाणां नियुक्तौ १० प्रतिशतं स्थानानि पूर्ववदेव निर्धारितानि स्युः ।

५. वनौषधिसम्पन्नेऽस्मिन् नवगठिते झारखण्डप्रदेशे आयुर्वेदमहाविद्यालयस्य चिकित्सालयस्य च संस्थापनापि भवेत् ।

६. राँचीस्थस्य राजकीयसंस्कृतमहाविद्यालयस्य जीर्णोद्धारो भवेत् ।

इमे समेऽपि प्रस्तावाः डोरण्डास्थितस्य महाविद्यालयस्याचार्येण पूर्वसंस्कृतविभागाध्येन डा०एन०आर० दूबे-महोदयेनोपस्थापिताः । ※

मुद्रकेण, प्रकाशकेन डॉ० हरिगोपालशास्त्रिणा ज्वालापुरीये 'अनुभव प्रिंटिंग प्रेस' मुद्रणालये मुद्रापयित्वा भारतोदयः' मासिकं मुखपत्रं प्राकाश्यं नीतं हरिद्वारस्थितया ज्वालापुरीय-गुरुकुलमहाविद्यालयसभया ।
सम्पादकः डॉ० हरिगोपालशास्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu